द्वादशः पाठः

मातृवन्दना-गीतिः

मरूभूमिरियं आधुनिक संस्कृतसाहित्यस्य रचनास्थली अस्ति। जयपुरनगरं तु 'अपराकाशी' अपि कथ्यते। डॉ. हरिरामआचार्यस्य जन्मः राजस्थानप्रान्ते 'स्वर्णनगरी' इति नाम्ना विख्याते जैसलमेरनगरे श्रीगणेशदत्त आचार्य महोदयस्य गृहे १९३६ तमे ख्रिष्टाब्दे अभवत्।

आचार्यमहोदयेन लघुकाशी इतिनाम्ना विख्यातम् 'जयपुरनगरम्' स्वकर्मक्षेत्रं अङ्गीकृतम्। राजस्थानविश्वविद्यालये 'प्रोफेसर', 'डीनफैकल्टी' चेतिपदम् अलंकुर्वन्, असंख्यान् छात्रान् शिक्षयन् संस्कुर्वन् च सुरभारतीम् आराधना कृता। भवता 'पूर्वशाकुन्तलम्, 'गाहा-सतसई', 'मधुच्छन्दा' आदिग्रन्थाः विरचिताः। तेन हिन्दीभाषायाम् कविता-संग्रहः, जैनागमानां, प्राकृत-ग्रन्थानां, गाथानाम् च काव्यानुवादः अपि कृतः। रङ्गमञ्चे प्रस्तुतिहेतु अनेकेषाम् नाटकानां रचनया, मञ्चनेन सह आचार्यमहोदयस्य चलचित्रे, आकाशवाण्यामपि विशिष्टः योगदानमस्ति। भवता राजस्थानप्रान्तस्य 'संस्कृतअकादमी' इति संस्थायाः अध्यक्षपदमपि अलंकृतम्।

अनेन 'राजस्थान-साहित्य-अकादमी' नाम्ना संस्थायाः सर्वोच्च 'मीरापुरस्कार' (१९७२ ई.), 'राजस्थानसंस्कृतअकादमी' संस्थायाः सर्वोच्चनाट्य पुरस्कारः (१९९८ ई.), 'मधुच्छन्दा' इति गीतिकाव्यस्य कृते 'माघपुरस्कारः' (२००१ ई.) अपि प्राप्तः। संस्कृतभाषायाः विस्ताराय, नवोन्मेषाय च राष्ट्रपतिपुरस्कारेण अपि सम्मानितः।

संस्कृतसाहित्ये गीतिकाव्य परम्परायाम् वैदिककालादेव सरसानां गीतिकाव्यानाम् रचना अजस्रास्ति। इमामेव परम्परां निर्वहन् डॉ. आचार्यः हृद्यं, भव्यं, सुश्राव्यं च गीतिकाव्यम् 'मधुच्छन्दा' इति रचितवान्। अस्मिन् काव्ये नवीनेषु गेय-छन्दसु रचिताः गीतिकाः सरसाः, सुमधुराः आह्लादकाश्च सन्ति। अनेन युगबोधपरकानां, भाव-प्रवणानां, प्रयोगधर्मीविषयाणाम् गीतिकानां न केवलं रचना कृता अपितु काव्यमञ्चेषु तासां पाठमपि कृतम्।

प्रस्तुतः पाठः मधुच्छन्दायां 'राष्ट्रिय' विषयान्तर्गते रचिताभ्यः गीतिकाभ्यः सङ्कलितः। अस्यां कविना मातृभूभारतेः वन्दनायाः आह्वानं कृतम्। मातृभूमेः स्वरूपाख्यानेन सह सुधिजनैः आचरणीया राष्ट्रियतायाः आख्यानं कृतम्। शुभाशंसनापि कृता यत् भारत-राष्ट्रं सुराष्ट्रं भवतु। सुशासनस्य लोकशासनस्य च स्थापना भवतु।

मातृवन्दना-गीतिः

गीयतां गीयतां गीयताम् ,
अद्य मातृवन्दना मधुस्वरेण गीयताम्।
मातृभूरियं हि कर्मभूः पुराणमङ्गला।
सुविश्रुता तपोव्रता सुदर्शना सुवत्सला।।
अनादि-धर्म-मालिनी,
अनन्त-पुण्य-शालिनी।
समृद्धि-बुद्धि-शक्तिदा सदैव मुक्तशृङ्खला।।
चीयतां चीयतां चीयताम्,
भारतीयशो भृशं समस्त दिक्षु चीयताम्।।
स्वतन्त्रतामृतं सुपर्णकैः दिवः समाहृतम्।
हुतात्मभिः समर्पितं प्रभा-रतं सु-भारतम्।
न तत्र रक्तमण्डनम्,
भवेन्न शान्ति-खण्डनम्।
विपन्न रक्षणं सदैव शस्त्रिणां महाव्रतम्।
लीयतां लीयतां लीयताम्,
अन्धतामसी घृणा-निशा क्षणेन लीयताम्।।
भवेत् क्वचिन्न भ्रष्टता, न सच्चरित्र-दूषणम्।
मनुष्यता भवेत् समस्त-सम्प्रदाय-भूषणम्।।
विभिन्न-मार्ग-मण्डनाः
सुबन्धवः समे जनाः,
अनेकतासु चैकता हि संस्कृतेर्विभूषणम् ।।
पीयतां पीयतां पीयताम्,
बन्धु-भावना-सुधा-मुदा सदैव पीयताम्।।
न दीनलोकमोषणं न हीनभावपोषणम्।
न हिंसनं भवेत् क्वचिन्न वञ्चनं न शोषणम्।।

हितैषितैव वर्तताम्,
सुराष्ट्रकं प्रवर्धताम् ।
अकण्टकं नु भारतं भवेतभीति-काननम्।।
धीयतां धीयतां धीयताम्,
वीतकल्मषं हि लोकशासनं विधीयताम् ।।

❀ ❀ ❀

शब्दार्थाः

कर्मभूः	–	कर्माणां भूः (कर्मभूमि) ।
पुराणमङ्गला	–	पुरातना च मङ्गला च ।
सुविश्रुता	–	बहुश्रुता, सुविख्याता ।
तपोव्रता	–	तपो एव व्रतो यस्याः सा ।
सुदर्शना	–	सुष्ठुदर्शना ।
सुवत्सला	–	श्रेष्ठ-संततिसंयुक्ता ।
शक्तिदा	–	शक्तिम् ददाति या सा ।
मुक्तशृङ्खला	–	मुक्ताशृङ्खला यस्याः सा (स्वतन्त्रा) ।
चीयतां	–	वृद्धिं प्राप्नोतु ।
भृशं	–	बहु।
सुपर्णकैः	–	शोभनाः पक्षाः यस्य सः सुपर्णः तैः (गरुड़ पक्षी)।
समाहृतम्	–	सम्यक् रूपेण आहृतम् (सूर्य की किरणों द्वारा)।
हुतात्मभिः	–	हुता आत्मा यैः तैः (स्वतन्त्रतासेनानियों के द्वारा)।
प्रभारतम्	–	कान्तिमत्।
रक्तमण्डनम्	–	रक्तेन मण्डनम्।
विपन्नरक्षणम्	–	विपन्नानाम् किंवा दीनजनानाम् रक्षणम्।
शस्त्रिणाम्	–	शस्त्राणि धारयन्ति ये तेषां।
लीयताम्	–	लीनं भवतु।
अन्धतामसी घृणा निशा	–	घृणारूपीतामसी-अन्धकारेणसंयुक्ता निशा।
दूषणम्	–	दोषम्, क्षयम्।
मण्डनाः	–	सुशोभिताः।

मुदा	–	मोद सहितम्।
दीनलोकमोषणम्	–	दीनानां लोकानां च मोषणं न भवेत्।
हिंसनम्	–	हिंसा।
वंचनम्	–	छलं, कपटम्।
हितैषितैव	–	हितस्य इच्छा एव।
प्रवर्धताम्	–	वृद्धिं प्राप्नोतु।
अकण्टकम्	–	कण्टकेन रहितम् भवतु।
धीयताम्	–	धारयतु।
संस्कृतेर्विभूषणम्	–	संस्कृत्याः आभूषणम्।
वीतकल्मषम्	–	निर्मलम्।
लोकशासनम्	–	लोकानां, प्रजानां शासनम्।
भवेदभीतिकाननम्	–	भयरहितं काननं, वनमिव भवेत्।

अभ्यासः

वस्तुनिष्ठात्मक-प्रश्नाः –

प्र. १. सुदर्शना, सुवत्सला का कथिता ?

(क) प्रदेशभूः (ख) मातृभूः

(ग) माता (घ) स्वसृ ( )

प्र. २. पाठानुसारेण किं वर्तताम् ?

(क) सुराष्ट्रकम् (ख) हितैषितैव

(ग) सदाचरणम् (घ) लोकशासनम् ( )

प्र. ३. समस्त-सम्प्रदाय-भूषणम् किं नु भवेत् ?

(क) मनुष्यता (ख) सदाशयता

(ग) भ्रष्टता (घ) बन्धुता ( )

प्र. ४. 'शस्त्रिणां महाव्रतं किं अस्ति ?

(क) रक्तमण्डनं (ख) दीनलोकमोषणं

(ग) शान्ति-खण्डनं (घ) विपन्नरक्षणं ( )

प्र.५. रिक्तस्थानपूर्तिः क्रियताम्–

(क) समृद्धि–बुद्धि–शक्तिदा .... ।।

(ख) .... क्षणेन लीयताम्।

(ग) न दीनलोकमोषणं ....न शोषणम् ।।

(घ) धीयतां .... विधीयताम्।

अतिलघूत्तरात्मक–प्रश्नाः–

प्र.१. मातृवन्दना कीदृशेन स्वरेण गीयताम् ?

प्र.२. कस्य दूषणं न भवेत् ?

प्र.३. कस्य मोषणं न भवितव्यम् ?

प्र.४. लोकशासनं कीदृशं विधीयताम् ?

लघूत्तरात्मक–प्रश्नाः –

प्र.१. मातृभूः विशेषणानां वर्णनं कुरुत।

प्र.२. संस्कृतेः किं विभूषणम् ?

प्र.३. शस्त्रिणां महाव्रतं किं अस्ति ?

निबन्धात्मक–प्रश्नाः–

प्र.१. मातृभूमेः स्वरूपवर्णनम् कुरुत ।

प्र.२. सुराष्ट्रस्य लोकशासनस्य च किं अवधारणास्ति ?

प्र.३. संस्कृतेः संरक्षणाय किं कर्तव्यम् ?

व्याकरणात्मक–प्रश्नाः–

१. अधो–लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः –

			सन्धिः	सन्धिनाम
(क)	एव + इति	=	....	....
(ख)	सन्निपत्य + अभियुक्तः	=	....	....
(ग)	कुतो + नु + एष	=	....	....
(घ)	निः + अनुक्रोशा	=	....	....
(ङ)	आर्यपुत्रस्य + उल्लापाः	=	....	....

२. अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विच्छेदो विधेयः -

	सन्धिपदम्		विच्छेदः	सन्धिनाम
(क)	हुतात्मभिः	=	....	....
(ख)	भवेन्न	=	....	....
(ग)	चैकता	=	....	....
(घ)	संस्कृतेर्विभूषणं	=	....	....
(ङ)	मातृभूरियम्	=	....	....

३. निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -

	समस्तपदम्		विग्रहः	समासनाम
(क)	दीनलोकमोषणम्	=	....	....
(ख)	अकण्टकम्	=	....	....
(ग)	वीतकल्मषम्	=	....	....
(घ)	लोकशासनम्	=	....	....
(ङ)	मातृवन्दना	=	....	....

४. अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -

	पदम्	शब्दः	विभक्तिः	वचनम्
(क)	स्वरेण	....	....	....
(ख)	दिक्षु	....	....	....
(ग)	शस्त्रिणाम्	....	....	....
(घ)	काननम्	....	....	....
(ङ)	सुपर्णकैः	....	....	....

५. निम्नलिखितानां तिङन्तपदानां धातुः लकारः पुरुषः वचनञ्च पृथक् निर्दिश्यताम् -

	तिङन्तपदम्	धातुः	लकारः	पुरुषः	वचनम्
(क)	चीयताम्	....	....	....	....
(ख)	समाहृतम्	....	....	....	....
(ग)	वर्तताम्	....	....	....	....

(घ) प्रवर्धताम् ....

(ङ) विधीयताम् ....

(च) भवेत् ....

६. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् –**

पदम्	प्रकृतिः	प्रत्ययः
(क) समर्पितम्	....	....
(ख) रक्षणम्	....	....
(ग) वञ्चनम्	....	....
(घ) मनुष्यता	....	....
(ङ) भारतम्	....	....

❀ ❀ ❀